**UGC Journal No. : 41784** **ISSN: 2349-5928**

# HUMANITIES AND SOCIAL SCIENCE REVIEW

(*An International Peer Reviewed Refereed Journal*)

**Editor in Chief**

***Professor Vinay Kumar Pandey***

*Department of Jyotish, Faculty of S.V.D.V.*

Banaras Hindu University,

Varanasi-221005

Scanned with CamScanner

## Cite this Issue

**As**

**Vol. 7 No.1 *HSS Review* 2020**

Humanities and Social Science Review an International peerreviewed Referred Journal is published bi-annually by Vyas Prakashan for Sunil Kumar Tripathi, Pragyanagar Colony Sunderpur, Varanasi-221005, India. Articles and other contributions for possible publication are welcome. Views expressed in the Articles, Shorter Articles, Book Reviews and all other contributions published in this Journal are those of the respective authors and do not necessarily reflect the views of the Editorial Board of the Humanities and Social Science Review and author shall be solely responsible for the same.

**COPYRIGHT** © 2019 Sunil Kumar Tripathi, Pragyanagar Colony Sunderpur, Varanasi-221005

ISSN: 2349-5928

**Email Id.** hssreview1@gmail.com

**PH. No.**+91 9453036274, +91 9452141671

**Printed by:**Vikash Printer, Varanasi, India.

**Published By:** Vyas Prakashan, Man Mandir, Varanasi, India.

**Price:₹ 500.00**

Scanned with CamScanner

# Humanities and Social Science Review

*Vol. 7 No. 1* *ISSN 2349-5928* *January–June 2020*

## CONTENTS


| S.N. | Title | Pg. No. |
|---|---|---|
| 1. | La Folie Dans Madame Hermet et Miss Harriet de Maupassant<br>**Aakash Dwivedi** | 1-10 |
| 2. | Nepal a Source Country of Human Trafficking: A Study<br>**Aman Kumar** | 11-19 |
| 3. | संस्कारों का महत्व एवं उपादेयता<br>**ओम नमो नारायण उपाध्याय** | 20-31 |
| 4. | ग्रहलाघवस्य वैशिष्ट्यम्<br>**सुनील कुमार त्रिपाठी** | 32-48 |
| 5. | भास्कराचार्यस्य ग्रहगणितवैशिष्ट्यनिरूपणम्<br>**श्री अश्विनी-पाण्डेयः** | 49-57 |
| 6. | इन्हीं हथियारों से : भारतीय अस्मिता का कीर्तिगान<br>**डॉ0 श्रद्धा सिंह** | 58-65 |
| 7. | 'पूर्वमध्यकालीन सांकेतिक प्रतीकों एवं अंकनो का अध्ययन' (उत्तर–भारत के विशेष सदंर्भ में)<br>**हेमन्त सिंह** | 66-71 |
| 8. | पण्डितराजकृतकाव्यविभागः<br>**इन्द्र चन्द** | 72-77 |
| 9. | आचार्यमम्मटदिशा व्यञ्जनावृत्तिविमर्शः<br>**शिवाकान्तपाण्डेयः** | 78-81 |
| 10. | सत्य के प्रयोग (आत्मकथा) महात्मा गाँधी के पुस्तक की विवेचना और समीक्षा<br>**अमरनाथ सिंह** | 82-94 |
| 11. | परम्परागत शिक्षा व्यवस्था में ऑनलाइन शिक्षण की समस्याएँ तथा उनका समाधान<br>**पुनीता गुप्ता** | 95-98 |


Scanned with CamScanner

| | | |
|---|---|---|
| 12. | भारतीय ज्ञान परम्परा<br>**सुबोधकांत मिश्र** | 99-104 |
| 13. | हिंदी साहित्य में तुलसीके ''राम'' की परिकल्पना<br>**रजनीश कुमार** | 105-108 |
| 14. | वेदोक्तं सृष्टिविज्ञानम्<br>**कृष्ण मुरारी त्रिपाठी** | 109-115 |
| 15. | A Study on E-Commerce Growth in India<br>**Amit Kumar** | 116-120 |
| 16. | Alterations in gill structure in Tropical reef fishes as a result of elevated temperatures<br>**Dr. Kumari Smita** | 121-125 |

Scanned with CamScanner

# वेदोक्तं सृष्टिविज्ञानम्

*कृष्ण मुरारी त्रिपाठी**

"अनन्तानि वै ब्रह्माण्डानि" इति तैत्तिरीयश्रुतिप्रमाणेन ब्रह्माण्डानामनन्तत्वं व्यक्तं भवति अनन्तब्रह्माण्डेष्वपि स्वकीयं ब्रह्माण्डं चतुर्दशभुवनात्मकं विद्यते। अयं सन्दर्भः प्रबन्धस्यास्य क्रमे निरूप्यते।

**परात्परकेन्द्रसम्बद्धान्यनन्तमहाब्रह्माण्डानि सन्ति।**
**महाब्रह्माण्डकेन्द्रसम्बद्धानि सन्त्यनन्तब्रह्माण्डानि।**

तत्र स्वकीय ब्राह्मण्डं सत्यकेन्द्रिकमेव। स्वब्रह्माण्डीय चतुर्दशभुवनेषु भूगोलादुर्ध्वं सप्तोर्ध्वलोकास्तथाधः सप्तपाताललोकाः सन्ति। तत्र सप्तोर्ध्वलोकेषु जनः तपः सत्यं च न दृश्यते। केन्द्रप्रतिकेन्द्रान्तरसिद्धान्तेन स्व-स्व केन्द्रिकाकर्षणनिष्पत्या सर्वे लोकाः भुवनानि वा निबद्धानीति सङ्केतोऽपि वैदिकवाङमये प्राप्यते। महर्लोकः महाकाशः महानस्वर्गः महत्पिण्डानां निकेतनं मन्यते।[१]

द्युलोकः महर्लोकादधः स्तरत्रयात्मकः सूर्यादारभ्य ध्रुवान्तं मन्यते। ध्रुवादुर्ध्वं महर्लोकः। सूर्यः वरूणकेन्द्रिकः ससूर्यवरूणः यमकेन्द्रिकः सङ्केतित इति वैदिकमूलेन विज्ञान विद्युतः प्रमाणेन ज्ञायते।[२]

त्रिलोक शब्देन भूः भुवः स्वश्चेति। तत्र भूः नाम भूगोलः भुवः नाम भूगोलीयान्तरिक्षं स्वः नाम सूर्यः नक्षत्राणि वरूणात्मकाश्चाकाशगङ्गास्तथा यमात्मकानि केन्द्राणि च समगच्छान्ति।[३]

ऋग्वेदसंहितायां यजुर्वेदसंहितायां शतपथब्राह्मणं तथैत्तरेय तैत्तिरीयताण्ड्यगोपथादिषु ब्राह्मणग्रन्थेषु विश्वसंस्थानं त्रिगोलीयायनं च सम्यकवर्णितं दृश्यते।[४]

**( २ ) सम्वत्सरस्वरूपम्**

शतपथब्राह्मणे तथा ऋग्वेदे च ऋतुचक्रपर्ययः सम्वत्सरद्योतकत्वेन प्राप्यते। समानां मास आकृतिः। अर्थात् वर्षस्याकृतिर्मासाः कथिता।[५]

"वेदमासो धृतव्रतो द्वारशप्रजावतः। वेदा य उपजायते।" अर्थात् धृतव्रतः प्रजावतः द्वादशमासाः द्वादशप्रजवतः वरुणः वेद जानातीत्यर्थः। अनने वर्षे द्वादशसौराश्चान्द्रश्च मासाः सिद्धयन्ति। द्वादशारं न हि तज्जराय ववर्तिचक्रं परिध्यामृतस्य। आपुत्राअग्नेर्मिधुनासो सप्त विंशतिश्च तस्थुः।[६]

* शोधच्छात्रः, वेदविभागः, संस्कृतविद्याधर्मविज्ञानसंकायः, काशीहिन्दूविशविद्यालयः



Scanned with CamScanner

अर्थात् द्वादशारं द्वादशविभागात्मकं राशिचक्रात्मकं द्वादशमासात्मकं राशिमण्डलं तन्नहि जराय विनाशयेति। परिद्यामृतस्य चक्रं ववर्ति। अर्थाद् द्युलोकममृतात्मकं चक्रप्रतिचक्रात्मकेन भ्रमतीत्यर्थः। इमेऽग्निपुत्राः मिथुनासो सप्तशतानि विंशतिश्च ३६०° × २ =७२० दिवस रात्र्ययोः विभाजकाः सन्ति। सापेक्षिकत्वेन सौरभ्रमणप्रमाणेन वर्षगतांशत्मकविभागवशत् दिनरात्र्योः संख्याः मिथुनात्मकत्वेनाग्नेः निरूपिताः। द्वादशविभागात्मकाः द्वादशपरिधयस्तथैकचक्रं त्रीणिनाभ्यानि चात्र कथितानि। इत्यनेन सूर्यस्याभाषिकत्वेन भ्रमणात्मकचक्रं सम्पद्यते तं चक्रं को वेत्ति? यत्र चक्रे ३६० शङ्क्वोऽर्पिताः। अस्य चलाचलासः चलत्वं न प्रतिभाति परं चलत्वं विद्यते। यथात्र[७]

**द्वादशप्रधयश्चक्रमेकं त्रीणि नाभ्यानि क उ तच्चिकेत।**
**तस्मिन्त्साकं त्रिशतान् शंकवोऽर्पिताः षष्टिर्न चलाचलासः।**

अनेन संवत्सरचक्रे सूर्यकृताः द्वादशमासाः द्वादशप्रधयः३६० शङ्कवः ३६०सौरदिवसाः चलात्मकाः सन्ति परमचलाख्याः प्रतिभान्ति।

तैत्तिरीयसंहितायां द्वादशमासौः सहाधिमासस्यापि सङ्केतः प्राप्यते। यथा[८]

मधुश्चमाध्यवश्च शुक्रश्च शुचिश्च नभश्च नभस्य श्चेश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयाम गृहीतोऽसिसं सर्पोस्यंहस्पत्यायत्वा।

अत्र संसार्पोऽधिमासाख्योऽहस्पतिस्तु क्षयाख्यमासस्तथा मधुप्रभृतयः तपस्यान्तं द्वादशमासाः ऋत्वाभिप्रायिकाः सौरचान्द्रयोः समवेतत्वेन सङ्केतिताः। अत्र भाष्यकारमाधवाचार्यमतेन मधुमाधवादीनां वर्णनत्वन्मासानां सौरत्वं परं संसर्पस्याधिमासत्वेन तथाहस्पतेः क्षयाख्यमासत्वेन निवेशत्वाच्चान्द्रमासस्यापि समन्वितपमुपलभ्यत।

**( ३ ) ऋतुक्रमः –**

तैत्तिरीयसंहितायां ऋतुक्रमोऽपि प्राप्यते। यथा-[९]

मधुश्चमाधवश्च वासन्तिकावृत् शुक्रश्च शुचिश्च ग्रैष्मावृत् नभश्चनभस्यश्च वार्षिकावृत् इषश्चोर्जश्च शारदावृत् सहश्च सहस्यश्च हैमान्तिकावृतु पतश्च पपस्यश्च शैशिरवृतु।

एवं षडर्तवः संकेपिताः। द्वौ-द्वौ मासौ प्रतिऋतुक्रमे वसन्तादिक्रमेण सम्वत्सरे षड्ऋतवः कथिताः। रीत्यत इति परिलक्ष्यते ऋत् तत्वस्यान्तरमनेनेति ऋतुः ऋतवः सम्वत्सरचक्रपर्ययबोधकः।[१०]

अत्र ऋतुचक्रस्य सम्वतसरत्वं प्रतिपादयन् मासादिवसादीनां विभाग शुभमूहर्तसंयोगेन दीक्षादीनां विधानमपि दर्शितम्। मधुमाधवौ वस्तद्योतकौ वसन्तस्य प्रमीयत्वात। एवं यदा वसन्ताप्रमीयते तदा वसन्तः एवमन्येषामपि बोधः।

**यजुर्वेदीय वाजसनेयिसंहितायां** वर्षस्य ऋतुतुक्रमबोधकपर्ययो विभागश्च तथा कालस्य व्यक्तवेन सौरचान्द्रसावनादि भेदाः निरूपिताः तत्र कालस्य व्यक्तिवेन



Scanned with CamScanner

सौरचान्द्रसावनादि भेदाः निरूपिताः। तत्र कालस्य सूक्ष्मविभागस्य संङ्केतोऽपि प्राप्यते। यथा[११]–उपयाम गृहीतोऽसि। मधवे ..... आबृहस्पतये त्वा ।।

एवमैतरेयब्राह्मणोऽपि प्रमाणपलभ्यते।[१२] इत्य ऋतुपर्यायबोधकत्वेन सम्वत्सरचक्रं सापेक्षिकत्वेन सूर्यभ्रमणानुरोधे प्राप्यते। चन्द्रान्तरवशादधिमासपातस्य परम्परापि वैदिककालादेवागच्छति। मन्दोच्चस्य स्पष्टार्चाभवेऽपि क्ष्माख्यमासपातस्य सप्ष्टाङ्केतोऽपि वैदिककालादेव प्राप्यते। तैत्तिरीयब्राह्मणेऽधिमासक्ष्यमासयोः संस्कारप्रकारोऽपि समुप-लभ्यते। एवं कालगणनं सूक्ष्मत्वेन वैदिकवाङमये प्राप्यते। अतोऽग्रे ब्रह्ममोत्पत्तिवलम्ब्य विचर्यते।

**( 4 ) ऐतिहासिकक्रमः –**

प्राचीन वैदिक परम्परा सर्वतो भावेन विशिष्टाआसीदिति विभिन्न प्रमाणानि प्राप्यन्ते।

यास्कात्पूर्वमेव ऋकालः समाप्तः प्राचीन ज्ञानविज्ञानकलादर्शनाध्यात्मादीनां युगानुरोधे यथोपलब्धया वर्गीकरणं हि महाभारतादनन्तरं प्रारब्धम्। पूर्वक्रमें सप्रयोगविस्तृतानां सङ्कोचक्रमोऽपि सूत्रको दृश्यते। यास्कः चाणक्याः वराहः, आर्यभट्टः ब्रह्मगुप्तः भास्करः बल्लालः गणैश्दैवज्ञः जयसिंहः,मधुसूदनओझा, लोकमान्यतिलकः डॉ. वासुदेवशरण अग्रवालः, डॉ0 बम्बावले, गिरिधरलालशर्मा चतुर्वेदः गोपीनाथकविराजः, डॉ. कपिलदेव द्विवेदी, म.म. सुधाकर द्विवेदी प्रभृतयः स्वनामधन्याः- महान्तः विशेषज्ञाः खृष्टपूर्व८०० तः साम्प्रतं यावज्जाताः।

**२. वैदिक ब्रह्माणडंखगोलशास्त्रं च**

**( १ ) ब्रह्माण्डोत्पत्तिः - ऋ.सं.,** १०/७२

देवाानां नु वयंजाना प्रवोचामविपन्यया। उक्थेषु शस्यमानेषु यः प श्यादुत्तरेयुगे।। ब्रह्मणस्पत्ति वीर्येण . . . भ्रदा अमृतन्धवः ।

व्यक्तविश्वस्य समुत्पत्तिः पूर्वावस्थायाः वर्णनमत्र दृश्यते सहैवोत्पत्तिक्रमस्यापि।

**( २ ) ब्रह्माण्डीयोत्पत्तिक्रमः** - ऋ.सं..१०/१९०/१-३.

**ऋतश्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततो राल्यजायत तः समुद्रो ऽर्णवः।।**
**समुद्रादर्णवादधिसम्वत्सरो अजायत। अहोरात्राणि विद्धद्विश्वस्य मिषतोवशी।।**
**सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत। दिवञ्चपृथिन्तरिक्षामथो स्वः।।**

अत्र ऋतसत्ययोःसंयोगेन विश्वमहार्णवस्योद्भवः निरूपितः। ततः क्रमात्द्वैतविश्वं पिण्डात्मकं पिण्डीयान्तरिक्षं च समुत्पन्नम् ।

**( ३ ) द्युलोकीयविकासः- तै.ब्रा., १/१/३.**

आपो वा इदमग्रे सलितमासीत्। तेन प्रजापतिरक्षाम्यत। कथमिद्र स्यादिति....... अत्र नक्षत्रादारभ्य भूगोलान्तमुत्पत्तिः गतिश्चात्रवर्णितः। तै.सं,७/१/५/२१.आपो वा इदमग्रे



Scanned with CamScanner

सलिलमासीत। तस्मिन प्रजापतिर्वायुर्भूत्वाचरत्। स इमामपश्यतां वराहो भूता .... सा प्रथम सा पृथिव्यभवत् . . . . . व्यक्तबिम्बीयविकासस्य नव्यक्रमस्य वैदिकमूलमत्र दृश्यते। अत. विश्वस्य द्वैतक्रमोऽपि संकेतितः ।

**( ४ ) शतपथे याज्ञवल्क्यगार्गी सम्बादरूपेण-**

विश्वत्पत्तिः संस्थानं च निरुपितम्। शतपथ ब्राह.,१/.४.६.६.१.

कस्मिन्नु खलु वायुरोत्श्च प्रातश्चेतन्यन्तरिक्ष लोकेषु गार्गीतिकस्मिन्नु खल्वन्तरिक्षलोका ओताश्चप्रोताश्चेत्यादयः ............। इत्यनेनाश्रयत्वमपिं ज्ञायते।

**( ५ ) परमविराटपुरुषात् विश्वोत्पत्तिः -**

विराटपरमेश्वरस्य नाभ्यामन्तरिक्षं शीर्षे द्युलोकस्तथा पदभागे भूमिः श्रोत्रे दिग्विभागाःपुरुषसूक्ते वर्णिताः ।

**नाभ्यामासीदन्तरिक्षं शीर्ष्णोद्यौः समवर्त्तत।**

**पदभ्याम्भूमिर्दिशः श्रोत्रात्तथा लोकनकल्पयन् ॥**

**द्युलोकस्येन्द्रेण धारणम्**

त्रिलाकाधिपतेरिन्द्रस्य महत्वं मिन्द्रेण द्युलोकस्य धारणं स्थिरत्वं स्थिरत्वात् कम्पनात् पिण्डानां वृत्तीयागतिश्च यथा-ऋ.सं, २/१२/२ तथा अर्थ्वसं, २०/३४/२-

**यः पृथिवीं व्यथमानामदं हृदयः पर्वतान् प्रकुपितां अरम्णात् ।**

**योऽन्तरिक्षं विममे वरीयो यो द्यामस्तम्नात्स जनास इन्द्रः ॥**

**सप्तोर्ध्वलोकानां संस्थानम् –**

**( ६ ) लोकानां स्थतिवर्णनं जैमिनीयब्राह्मणे १/३३/४-**

उपोदकः ऋतधामा, अपराजितः, अभिद्युः, प्रद्याः, रोचनः विष्टाः (सत्यंनाम ब्रह्मलोकः)। अन्यत्र-उपोदकः ऋतधामा, शिवः, अपराजितः, अभिद्युः, प्रद्युः रोचनश्च- जैमिनीय ब्राह्मणे, ३/३४/७.

**विश्वोत्पपत्ति गतिश्च –**

**( ७ ) लोकोत्पत्तितः गतिपर्यन्तं शतपथस्य विधानं यथा- - श.ब्रा., ११/८/१/२**

तद् यथा ह वै।इद्र रक्षचक्रंवा कौलालचक्रं वा प्रतिष्ठितं क्रन्देद एवं हैवेमालोका अघ्रवा अप्रितिष्ठाा आसुः । स हप्रजापतिदीक्षाञ्चक्रे। कथन्निवमेलोकाध्रुवाः प्रतिष्ठिताः स्युरिति। स एभिश्चैव पर्वतैर्नदीभिश्च इमाम् अदृहंद् वायोभिश्च मरीचिभिश्चान्तरिक्षम्। जीमूतैश्चनक्षत्रैश्चदिवम् ।। Cosmic cloud formation of hevenly bodies in the space and other formation indicated in the shatapatha Brahman.

**( ८ ) पौराणिकविधानम् विश्वोत्पत्तिः संस्थानं क्रमश्च –**



Scanned with CamScanner

९. वायुपुराणम् – अ. ४९/१५०, पद्मपुराणम, ७/२/१२, श्रीमदभागवत,२/५/३२, ४२, देवीभागवतम् स्कन्ध ८ पुराणपर्यालोचनम, पृ. १७३, चतुर्दशलोकरहस्यम्- पृ. १९०, प्रभृतिषु- चतुर्दशभुवनात्मकं ब्रह्माण्डं तदुप्पत्तिः संस्थानं विनाशकमश्च सम्यक वर्णितोऽस्ति।

सप्तौर्ध्वलोकाः

**सत्यं तपः जनश्च अकृतकत्रलोक्यम् अस्य सम्मती संज्ञा।**

जनः तपः जनश्च अकृतकत्रलोक्यम् –अस्य सम्मती संज्ञा। जनःमहः द्युलोश्च कृतकाद्यकतकत्रैलोक्यम्। अस्य क्रन्दसी संज्ञा। द्युःभुवःभूश्च कृतक त्रैलोक्यमस्य रोदसी संज्ञा।

**सप्तपाताललोकाः**

सप्तपाताललोकाः अतलः वितलः सुतलः तलातलः रसातलः महातलः पातालश्चेति।

वैदिकविज्ञान भारतीय संस्कृतिश्चेति ग्रन्थे म.म.गिरिधलालशर्मा चतुर्वेदी महोदयेन वैदिक विज्ञानस्य वैशिष्टां सम्यक प्रकाशितं सर्वतो भावेन।

**सप्तोर्ध्वलोकानांनिवेशः**

१. ॐ भूः २. ॐ भुव ३. ॐ स्वः ४. ॐ महः ५. ॐ जनः६. ॐ तपः७. ॐ सत्यंमिति

ॐ तपः ॐ सत्यम् त्तत्सवितुर्वरेण्यं ........... वा.स. प्रमाणेन सप्तोर्ध्वलाकाः ज्ञायन्ते।

**सूर्यात् ग्रहोत्पत्तिः**

ब्रह्माण्डपुराणे- चन्द्रसंहिताः ग्रहाः सर्वे विज्ञेयाः सूर्य सम्भवाः ।।२४/४६।।

दितिस्तथादितिभ्यां काश्यापयोगे देवासुरात्मक-द्युलोकीयविकासः- उत्तर ध्रुव दक्षिण ध्रुवीयसंस्थनाम्यां द्युलोकादारभ्यभूपृष्ठान्तं विकासोऽपि संकेतितः।

ऋ.सं. १०/१९०-तः काश्यपसंज्ञकात् प्रजापतिः सकाशात् द्युलोकस्य सूर्यस्य चोत्पत्ति कथितः। परमेष्ठिसोमस्याहुत्या सूर्यादयः नक्षात्राणि च दीप्तानीति।

**ब्रह्माण्डाभ्यन्तरे चतुर्दश भुवनानां भूः भुवः स्वः क्रमेण वर्गीकरणम्**

१०.भुपृष्ठादारभ्यसत्यान्तं त्रैलोक्यत्रयमन्तरिक्षत्रयं च यजुर्वेद प्रमाणेन तथा ऋग्वेदप्रमाणेन ज्ञायते। त्रिरन्तरिक्षां सविता महित्वना त्री रजांसि परिभूस्त्रीणि रोचना। त्रिस्रो दिवः पृथिवीस्तिस्रः इन्वति त्रीभिव्रतैरभि नो रक्षतित्मणाना।। ऋ.सं.,४/५३/५।।

विष्णुपुराणे, २/५/५ तथा ब्रह्माण्डपुराणे सप्तोर्ध्वलोकाः सप्तपाताललोकाश्च निरूपिताः। यथा –

**स्वर्लोकादपि सम्याणि पातालानीत नारदः।**



Scanned with CamScanner

**प्राह स्वर्गसदोमध्येपातालेभ्यो गतो दिवम् ॥**

ब्रह्माण्ड पुराणम, २१/४.

भूगोलेऽपि भूः भुवः स्वश्च त्रयः विभागाः भागवते भूगोलीय त्रैलोक्स्य संकेतः प्राप्तये।

**अन्तराल एव त्रिजगत्यास्तु दिशि।**
**दक्षिणस्यामधः स्याद् भूमेरूपरिष्ठाच्च जलात्॥भागवते,**

५/२६/४-११. मध्यकालीन सिद्धान्तोऽपि भूपृष्ठे भूगोलीय त्रैलोक्यं निरूपितम् **भूर्लोकाख्यो दक्षिणे व्यक्षदेशात् –**

**तस्मात् सौम्योऽयं भुवः स्वश्च मेरूः ।**
**लभ्यः पुण्यैः खे महः स्याज्जनोऽतोऽनल्पा-**
**नल्पैः स्वैस्तः सत्यमन्तः//सि.शि.गो.,** ३/४३/७

**भूगोलीय पातालव्यवस्था –**

**... पाताललोकाः पृथिवी पुटानि॥**
**चञ्चत् फणामणिगणांशुकृतः प्रकाश**
**एतेषु सासुरगणाः ऽणिनो बसन्ति**
**दहव्यन्ति दिव्यरमणी रमणीय देहैः।**
**सिद्धाश्च तत्र च लसत्कनकावभासैः॥**

- **सि.शि.गो.भु., श्लो.** /२३-२४

**कणाः - Particales प्रतिकणाः - Antiparticales विकिरणाः Radiations**

इति नव्यान्वेषणम् पदार्थस्य विभागः द्वैतस्य वर्गीकरणमिति।

**12. वैदिकसृष्टिविधानस्य संकेतः –**

को अद्धावेद क इह ....यदि वा न वेद।। ऋ.सं.,१०/८१/४, १०/१२९/६,१०/१२९/६,१०/१२/७-९,१०/७२/२,५,८तै.ब्रा०१०/२/२४;

**सृष्टितः पूर्वकालिकास्थितिः**

दासीन्नो सदासी तदानी ....... यस्मिन विश्वानि भुवनानि तस्थुः।। ऋ.सं. १०/१२१/१, १०/८/२- ऋषीत्येष गतौ धातुः श्रुतौ सत्ये श.ब्रा., ६/१/१/१, शतपथ बृहदारण्यक, २/३/१/४/२, अध्याय ३ ब्राह्मण १-४ कण्डिका

सदसत् शब्दयोः स्पष्टीकरणं शतपथ ब्राह्मणे प्राच्यते। द्वेवाव ब्राह्मणोरूपे-मूर्तचैवामूर्त च। मर्त्यं चामृतं च। स्थितं च यच्च। सच्चा त्यच्च। तदेवतन्मूर्ज यदन्यत्।



Scanned with CamScanner

वायोश्चान्तरिक्षाच्च। एतन्मर्त्यम्। एतत स्थितम्। एतन् सन्। अथामूर्त्तम् । वायुश्चान्तरिक्षं च। एतत् अमृतम,एतत् यत् एतत् त्यम्। बृहदारण्यक, २/३/१-४,२.१

अत एव सगुण ब्रह्मसूर्यस्योपासना क्रियते। यथोक्तम्।

स य एतमेवं विद्वाननादित्यं ब्रह्मो इत्युपासते। छान्दोग्य उप., ३/१९/१/४

विराडक्रमेण सृष्टेविकास:

तेजोमय महानण्ड: (हिरण्यगर्भ:) कथमुत्पन्न इति शतपथे आपोह वा इदमग्रे सलिलमेवास। ता अकामयन्त। कथं नु प्रजाये महि इति। ता अश्राम्ययन तास्तपोऽतपयन्त:। सु तपस्तप्यमानासुहिरण्यमयाण्डं सम्बभूव। तदिदं तावत् सम्वत्सरस्य बेलां यावत् पर्यप्लवत। ततः सम्वत्सरे पुरूष: समभवत् स: प्रजापति।। शतपथ ब्राह., १०/१/६/१-२.

डॉ. वासुदेवशारण अग्रवाल महोदयेन निरूपितं यत् तच्छलिलं समुद्रामिव गहनं गभीरं ''अम्भ'' आसीत् ।

अदिति: वरूण मित्र अर्यम्ण: कणा: प्रतिकणा: विकिरणाश्च ब्राह्मीस्थिति:- मूलसत्ता। त्रिनाभिचक्रमजरमनर्वम् .....

आप: - त्रिवर्गी (वरूण मित्र अर्यम्ण:) मूलतत्त्वानां क्रियाशीलावस्था, सलिलं माया सोस्यैव परिणामितरूपम् ।बृहती आप: – अपांबृहद्रूपम् । मूलादूद्भुता:- आप: प्रारम्भिक तरलावस्था (ईर्त्से ) प्रारम्भिकस्थितिश्च।

रिक्त:- नाभिब्रह्मचक्रयोरन्तरालः । अपां न पात् – नाभिकी अवस्था (ण्देसम्शू)

अर्धगर्भ: - **तन्मात्रावस्था नाभिकीयावस्था।**

**व्यक्तविश्वम्वादृश्यमानजगत्भूताद्यावस्था**

''सप्तयुञ्जन्तिरथमेकचक्रमिति वैदिकप्रमाणेन व्याख्यानं जायते।

**सन्दर्भ :**

१. भारतीय ज्योतिष दिक्षित: - वैदिककाल
२. पंञ्चाङ्ग कमेटी की रिपोर्ट - चुलैट:
३. विज्ञान विद्युत – वि.वा. मधुसूदन ओझा
४. वेदविद्या निदर्शन
५. सिद्धान्तशिरोमणि:-भास्कर:
६. ताराभोतिकी
७. अर्वाचीनज्योतिर्विज्ञान- रमानाथ सहाय:
८. सांख्यकारिका
९. श्रीमद्भावद्गीता
१०. तैत्तिरीयसंहिता, ५/६/७
११. वा.सं., ६/३०.
१२. एतरेय ब्रा., ३/१/७/७



Scanned with CamScanner